सूर्य्ये प्रवेशनिर्गमौ प्रतीयेते सोमोत्पत्तौ तु वह्न्यादिदेवतासु। नायं दोषः अस्मदादिदर्शनापेक्षया ज्योतिःशास्त्रस्य प्रवृत्तत्वात्। सोमोत्पत्तौ तु वह्न्यादिदेवतानां तत्तत्कलाप्रयुक्ता तृप्तिर्विवक्षिता। यदि सूर्य्ये प्रवेशनिर्गमौ यदि वा वह्न्यादिदेवतासु, सर्व्वथापि कलाप्रयुक्ता एव प्रतिपदादितिथयः। ननु सावनदिनेषु सौरदिवसेषु च निर्णयमुपेक्ष्य चान्द्रतिथिष्वेव कुतो निर्णयोद्यम इति चेत्। सन्देहसद्भावादिति ब्रूमः। न खलु सौरसावनादिदिवसयोः सन्देहसद्भावोऽस्ति नियतपरिमाणत्वात्। तच्च ब्रह्मसिद्धान्तेऽभिहितम् "सावनं स्यादहोरात्रमुदयादोदयाद्रवेः। रवेस्त्रिंशस्तु राश्यंशस्तिथिसम्भोग ऐन्दवमिति"। एकस्मिन् राशौ यावन्तं कालं रविर्वर्त्तते तावतः कालस्य त्रिंशो योऽयमंशः स सौरो दिवसः तिथिरेका कला तत्सम्भोग इन्दोर्यावता कालेन निष्पद्यते तदैन्दवं दिनम्। न चात्र सौरसावनयोरिव चान्द्रेऽपि दिने सन्देहाभावः शङ्कनीयः ह्रासवृद्धिवशेन सन्देहसद्भावात्। ह्रासवृद्धी च गर्गेण दर्शिते "खर्वो दर्पस्तथा हिंस्रस्त्रिविधं तिथिलक्षणम्। धर्म्माधर्म्मवशादेवं तिथिस्त्रेधा विवक्षितेति"। खर्वा समतिथिः। दर्पा वृद्धियुक्ता हिंस्रापक्षययुक्ता। तस्यैतस्य त्रैविध्यस्य विपरिवर्तनविशेषेण तिथिः संपूर्णा खण्डा चेति द्वैविध्यमापद्यते। तत्र संपूर्णा स्कन्दपुराणे दर्शिता "प्रतिपत्प्रभृतयः सर्वा उदयादोदयाद्रवेः। संपूर्णा इति विख्याता हरिवासरवर्जिताः" इति। हरिवासर एकादशी। या तु नोक्तलक्षणा सा खण्डतिथिः। तत्र संपूर्णायां विधिनिषेधयोर्नास्ति सन्देहः। खण्डतिथौ तु विधिनिषेधव्यवस्थामाह गार्ग्यः। "निमित्तं कालमादाय वृत्तिर्विधिनिषेधयोः। विधिःपूज्यतिथौ तत्र निषेधः कालमात्रके। तिथीनां पूज्यता नाम कर्मानुष्ठानयोग्यता। निषेधस्तु निवृत्त्यात्मा कालमात्रमपेक्षते" इति। एवञ्च सति खण्डतिथौ पूज्यत्वं निर्णेतव्यं भवति। तत्र प्रतिपदमारभ्य पञ्चदश्यन्तास्तिथयः क्रमेण निर्णीयन्ते।"

कालमाधवीयग्रन्थे विस्तरो द्रष्टव्यः। कारिकाभिस्तु माधवेन तत्तत्तिथिभेदेषु खण्डविशेषग्राह्यता प्रसङ्गागतमासादिनिरूपणपूर्वकं दर्शिता यथा

"व्याख्याय माधवाचार्य्यो धर्म्मान् पाराशरानथ। तदनुष्ठानकालस्य निर्णयं वक्तुमुद्यतः। अथोऽनुक्रम्यते श्लोकैरखिलो निर्णनीषितः। तावतैवानुतिष्ठासुर्निःसन्देहं प्रवर्त्तताम्। ततो मीमांसुचित्तस्य समाधानाय तत् पुनः। विवरिष्ये यथान्यायं श्रुतिस्मृतिवचोबलात्। पञ्च प्रकरणान्यत्र तेषूपोद्घातवत्सरौ। प्रतिपच्छिष्टतिथयो नक्षत्रादिरिति क्रमः। १उपोद्घाते कालसत्त्वं तस्य निर्णययोग्यता। ईश्वरो नित्यकालात्मा चिन्तनीयः स कर्म्मसु। जन्यकालेऽव्दमुख्यत्वमुक्तमेतच्चतुष्टयम्। अब्दायनर्त्तुमासाश्च पक्षः प्रकरणान्तरे २। अब्दः पञ्चविधश्चान्द्रो व्रतादौ तिलकादिके। सुजन्मादिव्रते सौरो गोसत्रादिषु सावनः। त्रयोप्याचार्य्यसेवादौ विकल्प्यन्ते निजेच्छया। आयुर्दाये तु नाक्षत्रो बार्हस्पत्योऽधिवत्सरः। चान्द्राणां प्रभवादीनां पञ्चके पञ्चके युगम्। संपरीदादन्विदेच्छब्दपूर्वास्तु वत्सराः। तिलो यवो वस्त्रधान्ये रजतं दीयतेऽत्र तु। उभे कर्म्मणि शान्ते च स्तोऽयने दक्षिणोत्तरे। वसन्ताद्यृतवो द्वेधा चान्द्राः सौराश्च चान्द्रकाः। चैत्राद्या अथ मीनाद्या मेषाद्या वा विवस्वतः। तेष्वाधानादयस्तद्वत् षण्मूर्त्तिव्रतपूजनम्। मासास्तु सावनः सौरश्चान्द्रो नाक्षत्र इत्यमी। दर्शान्तः पूर्णिमान्तो वा चान्द्रोऽसौ विप्रवैश्ययोः। सौरो राज्ञः सावनस्तु यज्ञे ज्यौतिषिके परः। माघादिमासभेदेषु तिलदानादयः स्मृताः। चान्द्रोऽधिमासोऽसंक्रान्तः सोन्तर्भवति चोत्तरे। असंक्रान्ताविकवर्षे द्वौ चेत्स सर्पआदिमः। क्षयमासो द्विसंक्रान्तः स चांहपतिसंज्ञकः। एतौ त्याज्यौ विवाहादौ संसर्पांहपती उभौ। शुद्धौ श्रौते तथा स्मार्त्ते मलमासो विविच्यते। काम्यारम्भं तत्समाप्तिं मलमासे विवर्जयेत्। आरब्धं मलमासात् प्राक्कृच्छ्रसत्रादिकं च यत्। तत्समाप्यं सावनस्य मासस्यानतिलङ्घनात्। आरम्भस्य समाप्तेश्च मध्ये चेत् स्यात् मलिम्लुचः। प्रवृत्तमखिलं काम्यं तदानुष्ठेयमेव तु। कारीर्यादि तु यत् काम्यं तस्यारम्भसमापने। कार्य्यकालविलम्बस्य प्रतीक्षाया असम्भवात्। अनन्यगतिकं नित्यमग्निहोत्रादि न त्यजेत्। गत्यन्तरयुतं नित्यं सोमयागादि वर्जयेत्। अगति ग्रहणस्नानं जातेष्टि,र्गतिसंयुतम्। इयं नैमित्तिके तस्य व्यवस्था नित्यवन्मता। शुद्धमासमृतानां स्यान्मलिने प्रथमाव्दिकम्। मलमासमृतानान्तु मले स्यादाव्दिकान्तरम्। दैवे मुख्यः शुक्लपक्षः कृष्णः पित्र्ये विशिष्यते। तृतीये तु ३ प्रकरणे